International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 126-127
© 2021 IJSR
www.anantaajournal.com
Received: 02-07-2021
Accepted: 10-08-2021

**Dr. Manoranjan Senapaty**
Associate Professor, Department of Sanskrit, Utkal University, Vani Vihar, Bhubaneswar, Odisha, India

**Corresponding Author:**
**Dr. Manoranjan Senapaty**
Associate Professor, Department of Sanskrit, Utkal University, Vani Vihar, Bhubaneswar, Odisha, India

# वैदिकव्याकरणे वर्णसमाम्नाय:

**Dr. Manoranjan Senapaty**

**शोधसार:-** शोधकर्मण्यस्मिन् वैदिकव्याकरणे प्रतिपादितानां स्वर तथा व्यञ्जनवर्णानां विषये आलोचितमस्ति । स्वर तथा व्यञ्जनवर्णानां लक्षणं तथा तेषां भेदश्च प्रदर्शित: वर्तते। स्थानप्रयत्नदिशा कस्य वर्णस्य क: बाह्यप्रयत्न: कश्च आभ्यन्तरप्रयत्न: तदपि निरूपित अस्ति।

**कूटशब्दा:-** वर्ण-समाम्नाय:, प्रातिशाख्येषु, स्वरव्यञ्जनवर्णश्च, समानाक्षरसन्ध्यक्षरश्च, सन्ध्यक्षरस्वरा:, उष्मवर्णा:, स्थानानि, बाह्यप्रयत्न:, आभ्यन्तरप्रयत्न:, दु:स्पृष्टप्रयत्न:, संयुक्तस्वर:, स्थानप्रयत्न: ।

## उपक्रम

वर्ण-समाम्नाय: वर्ण-समूह: नाम्ना निगद्यते। वाजसनेयप्रातिशाख्यानुसारं यस्मिन् समूहे संग्रहे वा वर्णानां पाठ: जायते, तद् वर्ण-समाम्नाय इति उच्यते।[१] प्रातिशाख्येषु मुख्यत: वर्णानां विभागद्वयं द्रष्टुं शक्यते, यथा- स्वरव्यञ्जनवर्णश्च। वर्णान्तरसहायतानपेक्ष तथा स्वयमुच्चरितवर्ण: स्वरवर्ण इति कथ्यते। [२] परन्तु य: वर्ण: उच्चारणार्थं वर्णान्तरस्य सहायताम् अपेक्षते, स: व्यञ्जननाम्ना ज्ञायते। [३] अत: व्यञ्जनवर्ण: स्वरवर्णेन साकं साम्मल्यैव उच्चार्यते। स्वरवर्णं विना व्यञ्जनवर्णस्य उच्चारणं न सम्भवति। स्वरवर्णस्य सहायतया उच्चारणत्वाद् व्यञ्जननाम ज्ञेयम्।

## स्वरवर्णानां विभाग:–

वैदिकव्याकरणे स्वरवर्णस्य भेदद्वयं दृश्यते स्म । यथा- समानाक्षरसन्ध्यक्षरश्च । येषां स्वरवर्णानाम् उच्चारणे समरूपता दृश्यते, ते समानाक्षरस्वरा उच्यन्ते। यथा – अ-आ-इ-ई-उ-ऊ-ऋ ॠ इत्यादय: अष्टाविति समानाक्षरस्वरा: भवन्ति। यतो हि स्थान तथा प्रयत्नदृष्ट्या एते उच्चारणाय समाना: सन्ति। द्वयो: स्वरवर्णयो: संयोगन उत्पन्नस्वरवर्ण सन्ध्यक्षरस्वरवर्ण इत्युच्यते, यथा - “आ+इ” इति एतयो: संयोगेव निष्पन्न: “ए” सन्ध्यक्षरस्वर उच्यते। एवं प्रकारेण “ओ-ऐ-औ” इति त्रय: वर्णा अपि सन्ध्यक्षरस्वरा: भवन्ति । एतत् त्रयमाहत्य “ए-ओ-ऐ-औ” इति चत्वार: सन्ध्यक्षरस्वरवर्णा: उच्यन्ते। द्वयोर्वर्णयो: संयोगत्वाद् संयुक्तस्वर इति अस्यापि नामान्तरं श्रुयते। [४]

एवं रीत्या अष्टौ समानाक्षरस्वरवर्णा: (अ-आ-इ-ई-उ-ऊ-ऋ-ॠ) तथा चत्वार: सन्ध्यक्षरस्वरा: (ए-ओ-ऐ-औ) इति सम्मिल्य द्वादशस्वरवर्णानां निर्देश: ऋग्प्रातिशाख्ये कृतोऽस्ति। परन्तु तत्रापि प्लुत ई३ वर्णस्यापि गणना स्वरत्वेन दृश्यते स्म। एवं च “ऌ” वर्णस्यापि स्वरवर्णत्वेन तत्र प्रयोग: दृश्यते। [५] एवं रीत्या ऋग्प्रातिशाख्यानुसारं सर्वमाहत्य वैदिकव्याकरणे चतुर्दशस्वरवर्णानाम् उल्लेख: दृश्यते।

## व्यञ्जनवर्णानां विभाग:-

ऋग्प्रातिशाख्येऽपि व्यञ्जनवर्णा त्रिधा विभज्यते स्म, यथा- स्पर्श-अन्त:स्थ तथा उष्मवर्ण:। अवयवद्वयस्य स्पर्शहेतौ उच्चरित: वर्ण: स्पर्श स्पृष्टवर्ण: वा उच्यते। अर्थात् येषां वर्णानाम् उच्चारणसमये मुखस्य द्वाभ्याम् उच्चारणावयवाभ्यां एकैकेन अवयवेन वायु: रुध्यते तथा एकैक: अवयव: परस्परं विच्छिद्य वायुं बहि: निष्कास्यते, ते स्पर्शव्यञ्जनवर्णनामधेया: । एतेषां संख्या पञ्चविंशति: सन्ति, एवञ्च पञ्चसु वर्गेषु विभक्ता: सन्ति। एकैकस्मिन् वर्गे पञ्चवर्णा: सन्ति, यथा- क-ख-ग-घ-ङ (कवर्ग:), च-छ-ज-झ-ञ (चवर्ग:), ट-ठ-ड-ढ-ण (टवर्ग:), त-थ-द-ध-न (तवर्ग:) प-फ-ब-भ-म (पवर्ग:) इति पञ्चविंशति स्पर्शव्यञ्जनवर्णा: सन्ति। य-र-ल तथा व इति चत्वार: वर्णा: अन्त:स्था: उच्यन्ते, यतो हि एते चत्वार: वर्णा: स्पर्श तथा

उष्मसंज्ञकवर्णानां मध्ये अर्थात् अन्तः तिष्ठन्ति। [६] श-ष-स-ह - क- प-अं-अः इति एते अष्टौ वर्णाः उष्मवर्णाः कथ्यन्ते। यतो हि एतेषां वर्णानाम् उच्चारणसमये निर्गतवायुः उष्म स्यात्। [७] एवं प्रकारेण ऋग्प्रातिशाख्ये पञ्चविंशतिस्पर्सवर्णाः, चत्वारः अन्तःस्थवर्णाः तथा अष्टौ उष्मवर्णानाम् उल्लेखः दृश्यते। एवमाहत्य प्रातिशाख्ये सप्तत्रिंशत् व्यञ्जनवर्णानां वर्णनं दृश्यते, एतेषां वर्णनम् अधः क्रियते।

**स्वरवर्णः–**

१- समानाक्षरः- अ, आ इ, ई, उ, ऊ, ऋ, ॠ, ई३, लृ३

२- सन्ध्यक्षरः - ए, ओ, ऐ, औ

**व्यञ्जनवर्णः -**

१- स्पर्शः - क, ख, ग, घ, ङ (कवर्गः)

च, छ, ज, झ, ञ (चवर्गः)

ट, ठ, ड, ढ, ण (टवर्गः)

त, थ, द, ध, न (तवर्गः)

प, फ, व. भ, म (पवर्गः)

२- अन्तःस्थः - य, र, ल, व

३- उष्मवर्णः - श, ष, स, ह, अं, अः, क(जिह्वामूलियः), प(उपध्मानीयः)

**स्थानप्रयत्नः–**

येनाङ्गविशेषेण यः वर्णः उच्चार्यते, तद् तस्य वर्णस्य स्थानमित्युच्यते। ऋग्प्रातिशाख्ये वर्णानां स्थानमधिकृत्य उच्यते स्म। स्थानानि नवैव, यथा- कण्ठ-उरस्-जिह्वामूल, तालु–मूर्द्धा-पार्श्व-ओष्ठ-तथा नासिका च। एतेभ्यः स्थानेभ्यः एव वर्णानाम् उच्चारणं जायते। केषां वर्णानां किं स्थानमिति अधः प्रदश्यैते।

१- कण्ठः - अ, आ, ह, अः (कण्ठ्यवर्णाः)

२- जिह्वामूलः - ऋ, ॠ, लृ,लॄ, क,ख,ग,घ,ङ (जिह्वामूलीयवर्णाः)

३-तालु - इ, ई, ए, ऐ, च, द, ज, झ, ञ, य, श (तालव्यवर्णाः)

४- मूर्धा - ट, ठ, ड, ढ, ण, ष (मूर्धन्यवर्णाः)

५- दन्तमूलः - त, थ, द, ध, न, स, र, ल (दन्तमूलीयाः)

६- वर्स्वः - र (वर्स्वः)

७- ओष्ठः - उ, ऊ, ओ, औ, प, फ, ब, भ, म, व, य (ओष्ठ्यवर्णः)

८- नासिका - ञ, म, ङ, ण, न (नासिकावर्णाः)

प्रत्येकस्य वर्णस्य उच्चारणार्थं प्रयत्नस्य आवश्यकता नूनं वर्त्तते एव। वर्णानाम् उच्चारणसमये अवयवानां यः व्यापारः, सः प्रयत्ननामधेयः। बाह्याभ्यन्तरभेदेन प्रयत्नः द्विविधः । वर्णस्य उच्चारणसमये मुखस्य बर्हि यो प्रयत्नः जायते, तद् बाह्यप्रयत्नः उच्यते। तदपि द्विविधः, यथा- अघोषः सघोषश्च । अघोषः घोषरहितः तथा घोषः नादः इति उच्यते। घोषरहितवायुना उत्पन्नः वर्णः अषोषः कथ्यते, यथा- क, ख, च, छ, ट, ठ, त, थ, प, फ, श, ष, स, अः, क, प, अं । घोषेन (नादेन) साकं वायुना उत्पन्नस्य वर्णस्य सघोषसंज्ञा जायते। यथा – ग, घ, ङ, ज, झ, ञ, ड, ढ, ण, द, ध, न, ब, भ, म, य, र, ल, व, ह।

वर्णानाम् उच्चारणसमये मुखस्य अन्तः यो प्रयत्नः जायते तद् आभ्यन्तरप्रयत्ननामधेयः । आभ्यन्तरप्रयत्नस्य नामान्तरं "करण"मिति अपि प्रयोगः ऋक्प्रातिशाख्ये दृश्यते स्म। आभ्यन्तरप्रयत्नस्य भेदत्रयं दृश्यते। यथा- स्पृष्टः, दुःस्पृष्टः तथा अस्पृष्टः, स्पर्शवर्णानां स्पृष्टप्रयत्नः जायते। प्रयत्नेऽस्मिन् द्वयोः अवयवयोः स्पर्शादनन्तरं तथा पृथक् भूत्वा वायोः प्रभावेन वर्णाः बर्हि निर्गच्छन्ति। स्पर्शवर्णाः एते एव भवन्ति । यथा- क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, ण, त, त, द, ध, न, प, फ, ब, भ, म । अन्तःस्थवर्णानां दुःस्पृष्टप्रयत्नः स्यात्। अतीवकाठिन्येन स्पर्शत्वाद् दुःस्पृष्टः इत्युच्यते। प्रयत्नेऽस्मिन् अवयवयोः किञ्चिदेव स्पर्शः जायते। अतः प्रयत्नोऽयमपि ईषत्स्पृष्टेति उच्यते। य-र-ल-व इति चत्वारः वर्णाः अन्तःस्थाः भवन्ति। सर्वेषां स्वरवर्णानां, अनुस्वारस्य तथा श, ष, स, ह (उष्म) वर्णानां आभ्यन्तरप्रयत्नः अस्पृष्ट एव। अस्पृष्टप्रयत्ने द्वयो उच्चारणावयवयोः स्पर्शः न जायते। अतः उच्चारणमिदम् अस्पृष्टमिति उच्यते इति प्रातिशाख्ये वर्णसमाम्नायस्य विवरणं विस्तरेण कृतमिति शम्।

**उपसंहारः -**

वैदिकव्याकरणमवश्ययमेव लौकिकव्याकरणस्य आधार इति वक्तुं शक्यते । शोधकर्मणि अस्मिन् वर्णसमाम्नायस्य अर्थः तथा विभागः प्रतिपादित अस्ति । अस्य अर्थः तथा विभागःप्रायशः लौकिकव्याकरणे साकं समानमेव । स्थानप्रयत्नविचारेणापि उभयत्र प्रायतः समानस्थितिः इति अनुमीयते । अत्र स्वर तथा व्यञ्जनवर्णस्य सार्थं भेदः अपि वर्णित अस्ति ।

**पादटीप्पण्यः**

१. वर्णाः यस्मिन् पठ्यन्ते स वर्ण-समाम्नाय। (वाजसनेय प्रातिशाख्य-८.१)
२. स्वयं राजन्ते न्यायेन व्यज्यन्त इति स्वराः। (वैदिकाभरणतैतिरीय प्रातिशाख्य। १.५)
३. परेण स्वरेण व्यजत इति व्यञ्जनम्। (वैदिकाभरणतैतिरीय प्रातिशाख्य। ९.६)
४. अकारस्य इकारेण उकारेण एकारेण ओकारेण च सन्धौ यान्यक्षराणि निष्पद्यन्ते, तानि तयोच्यन्ते। (उव्वटभाष्य १.२)
५. ऋक्प्रातिशाख्य १.३
६. स्पर्शोष्मणामन्तर्मध्ये तिष्ठन्तीति अन्तःस्थाः । (उव्वटभाष्य १९)
७. उष्मा वायुस्तत्प्रधानवर्णा उष्माणः । (उव्वटभाष्य १.१०)

**अनुशीलितग्रन्थसूची -**

१. द्विवेदी प्रो. पारसनाथ, वैदिकसाहित्य का इतिहास ,चौखम्बा सुरभारती प्रकाशन, वारणासी, २०२१।
२. चतुर्वेदः गिरिधरशर्मा एवं विद्याभाष्करः परेश्वरानन्दशर्मा, वैयाकरणसिद्धान्तकौमुदी, मोतिलाल बनारसीदास, दिल्ली,२००४।
३. गोयल डाँ. प्रीतिप्रभा, संस्कृत साहित्य का इतिहास (वैदिकखण्ड), राजस्थानग्रन्थागार, जोधपुर, १९९९।